॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ५९

स्वबलं व्यथितं दृष्ट्वा तुमुलं लोमहर्षणम् ।
भ्रातॄंश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान् ॥१॥

पितृव्यौ चापि सन्दृश्य समरे संनिषूदितौ ।
महोदरमहापार्श्वौ भ्रातरौ राक्षसर्षभौ ॥२॥

चुकोप च महातेजा ब्रह्मदत्तवरो युधि ।
अतिकायोऽद्रिसङ्काशो देवदानवदर्पहा ॥३॥

स भास्करसहस्रस्य सङ्घातमिव भास्वरम् ।
रथमास्थाय शक्रारिरभिदुद्राव वानरान् ॥४॥

स विस्फार्य महच्चापं किरीटी मृष्टकुण्डलः ।
नाम विश्रावयामास ननाद च महास्वनम् ॥५॥

तेन सिंहप्रणादेन नामविश्रावणेन च ।
ज्याशब्देन च भीमेन त्रासयामास वानरान् ॥६॥

ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे ।
भयार्ता वानराः सर्वे विद्रवन्ति दिशो दश ॥७॥

तेऽतिकायं समासाद्य वानरा मूढचेतसः ।
शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे ॥८॥

ततोऽतिकायं काकुत्स्थो रथस्थं पर्वतोपमम् ।
ददर्श धन्विनं दूराद्गर्जन्तं कालमेघवत् ॥९॥

स तं दृष्ट्वा महात्मानं राघवस्तु सुविस्मितः ।
वानरान्सान्त्वयित्वा तु विभीषणमुवाच ह ॥१०॥

कोऽसौ पर्वतसङ्काशो धनुष्मान्हरिलोचनः ।
युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः ॥११॥

य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः ।
अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः ॥१२॥

कालजिह्वाप्रकाशाभिर्य एषोऽभिविराजते ।
आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः ॥१३॥

धनूंसि चास्य सज्यानि हेमपृष्ठानि सर्वशः ।
शोभयन्ति रथश्रेष्ठं शक्रपातमिवाम्बरम् ॥१४॥

क एष रक्षः शार्दूलो रणभूमिं विराजयन् ।
अभ्येति रथिनां श्रेष्ठो रथेनादित्यतेजसा ॥१५॥

ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते ।
सूर्यरश्मिप्रभैर्बाणैर्दिशो दश विराजयन् ॥१६॥

त्रिणतं मेघनिर्ह्रादं हेमपृष्ठमलङ्कृतम् ।
शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते ॥१७॥

सध्वजः सपताकश्च सानुकर्षो महारथः ।
चतुःसादिसमायुक्तो मेघस्तनितनिस्वनः ॥१८॥

विंशतिर्दश चाष्टौ च तूणीररथमास्थिताः ।
कार्मुकाणि च भीमानि ज्याश्च काञ्चनपिङ्गलाः ॥१९॥

द्वौ च खड्गौ रथगतौ पार्श्वस्थौ पार्श्वशोभिनौ ।
चतुर्हस्तत्सरुचितौ व्यक्तहस्तदशायतौ ॥२०॥

रक्तकण्ठगुणो धीरो महापर्वतसंनिभः ।
कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥२१॥

काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते ।
शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान्पर्वतोत्तमः ॥२२॥

कुण्डलाभ्यां तु यस्यैतद्भाति वक्त्रं शुभेक्षणम् ।
पुनर्वस्वन्तरगतं पूर्णबिम्बमिवैन्दवम् ॥२३॥

आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम् ।
यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥२४॥

स पृष्टो राजपुत्रेण रामेणामिततेजसा ।
आचचक्षे महातेजा राघवाय विभीषणः ॥२५॥

दशग्रीवो महातेजा राजा वैश्रवणानुजः ।

भीमकर्मा महोत्साहो रावणो राक्षसाधिपः ॥ २६ ॥

तस्यासीद्वीर्यवान्पुत्रो रावणप्रतिमो रणे ।
वृद्धसेवी श्रुतधरः सर्वास्त्रविदुषां वरः ॥ २७ ॥

अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे ।
भेदे सान्त्वे च दाने च नये मन्त्रे च संमतः ॥ २८ ॥

यस्य बाहुं समाश्रित्य लङ्का भवति निर्भया ।
तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ २९ ॥

एतेनाराधितो ब्रह्मा तपसा भावितात्मना ।
अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ ३० ॥

सुरासुरैरवध्यत्वं दत्तमस्मै स्वयम्भुवा ।
एतच्च कवचं दिव्यं रथश्चैषोऽर्कभास्करः ॥ ३१ ॥

एतेन शतशो देवा दानवाश्च पराजिताः ।
रक्षितानि च रक्षामि यक्षाश्चापि निषूदिताः ॥ ३२ ॥

वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमतः ।
पाशः सलिलराजस्य युद्धे प्रतिहतस्तथा ॥ ३३ ॥

एषोऽतिकायो बलवान्राक्षसानामथर्षभः ।
रावणस्य सुतो धीमान्देवदनव दर्पहा ॥ ३४ ॥

तदस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव ।
पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ३५ ॥

ततोऽतिकायो बलवान्प्रविश्य हरिवाहिनीम् ।
विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ ३६ ॥

तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम् ।
अभिपेतुर्महात्मानो ये प्रधानाः प्लवङ्गमाः ॥ ३७ ॥

कुमुदो द्विविदो मैन्दो नीलः शरभ एव च ।
पादपैर्गिरिशृङ्गैश्च युगपत्समभिद्रवन् ॥ ३८ ॥

तेषां वृक्षांश्च शैलांश्च शरैः काञ्चनभूषणैः ।
अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ ३९ ॥

तांश्चैव सरान्स हरीञ्शरैः सर्वायसैर्बली ।
विव्याधाभिमुखः सङ्ख्ये भीमकायो निशाचरः ॥ ४० ॥

तेऽर्दिता बाणवर्षेण भिन्नगात्राः प्लवङ्गमाः ।
न शेकुरतिकायस्य प्रतिकर्तुं महारणे ॥ ४१ ॥

तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः ।
मृगयूथमिव क्रुद्धो हरिर्यौवनमास्थितः ॥ ४२ ॥

स राक्षसेन्द्रो हरिसैन्यमध्ये
नायुध्यमानं निजघान कं चित् ।
उपेत्य रामं सधनुः कलापी
सगर्वितं वाक्यमिदं बभाषे ॥ ४३ ॥

रथे स्थितोऽहं शरचापपाणिर्
न प्राकृतं कं चन योधयामि ।
यस्यास्ति शक्तिर्व्यवसाय युक्ता
ददातु मे क्षिप्रमिहाद्य युद्धम् ॥ ४४ ॥

तत्तस्य वाक्यं ब्रुवतो निशम्य
चुकोप सौमित्रिरमित्रहन्ता ।
अमृष्यमाणश्च समुत्पपात
जग्राह चापं च ततः स्मयित्वा ॥ ४५ ॥

क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम् ।
पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ ४६ ॥

पूरयन्स महीं शैलानाकाशं सागरं दिशः ।
ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन्नजनीचरान् ॥ ४७ ॥

सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा ।
विसिष्मिये महातेजा राक्षसेन्द्रात्मजो बली ॥ ४८ ॥

अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम् ।
आदाय निशितं बाणमिदं वचनमब्रवीत् ॥ ४९ ॥

बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः ।
गच्छ किं कालसदृशं मां योधयितुमिच्छसि ॥ ५० ॥

न हि मद्बाहुसृष्टानामस्त्राणां हिमवानपि ।
सोढुमुत्सहते वेगमन्तरिक्षमथो मही ॥ ५१ ॥

सुखप्रसुप्तं कालाग्निं प्रबोधयितुमिच्छसि ।
न्यस्य चापं निवर्तस्व मा प्राणाञ्जहि मद्गतः ॥ ५२ ॥

अथ वा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि ।
तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयम् ॥ ५३ ॥

पश्य मे निशितान्बाणानरिदर्पनिषूदनान् ।

ईश्वरायुधसङ्काशांस्तप्तकाञ्चनभूषणान् ॥ ५४ ॥

एष ते सर्पसङ्काशो बाणः पास्यति शोणितम् ।
मृगराज इव क्रुद्धो नागराजस्य शोणितम् ॥ ५५ ॥

श्रुत्वातिकायस्य वचः सरोषं
सगर्वितं संयति राजपुत्रः ।
स सञ्चुकोपातिबलो बृहच्छ्रीर्
उवाच वाक्यं च ततो महार्थम् ॥ ५६ ॥

न वाक्यमात्रेण भवान्प्रधानो
न कत्थनात्सत्पुरुषा भवन्ति ।
मयि स्थिते धन्विनि बाणपाणौ
विदर्शयस्वात्मबलं दुरात्मन् ॥ ५७ ॥

कर्मणा सूचयात्मानं न विकत्थितुमर्हसि ।
पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः ॥ ५८ ॥

सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः ।
शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमम् ॥ ५९ ॥

ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः ।
मारुतः कालसम्पक्वं वृन्तात्तालफलं यथा ॥ ६० ॥

अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः ।
पास्यन्ति रुधिरं गात्राद्बाणशल्यान्तरोत्थितम् ॥ ६१ ॥

बालोऽयमिति विज्ञाय न मावज्ञातुमर्हसि ।
बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे ॥ ६२ ॥

लक्ष्मणस्य वचः श्रुत्वा हेतुमत्परमार्थवत् ।
अतिकायः प्रचुक्रोध बाणं चोत्तममाददे ॥ ६३ ॥

ततो विद्याधरा भूता देवा दैत्या महर्षयः ।
गुह्यकाश्च महात्मानस्तद्युद्धं ददृशुस्तदा ॥ ६४ ॥

ततोऽतिकायः कुपितश्चापमारोप्य सायकम् ।
लक्ष्मणस्य प्रचिक्षेप सङ्क्षिपन्निव चाम्बरम् ॥ ६५ ॥

तमापतन्तं निशितं शरमाशीविषोपमम् ।
अर्धचन्द्रेण चिच्छेद लक्ष्मणः परवीरहा ॥ ६६ ॥

तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम् ।
अतिकायो भृशं क्रुद्धः पञ्चबाणान्समाददे ॥ ६७ ॥

ताञ्शरान्सम्प्रचिक्षेप लक्ष्मणाय निशाचरः ।
तानप्राप्ताञ्शरैस्तीक्ष्णैश्चिच्छेद भरतानुजः ॥ ६८ ॥

स तांश्छित्त्वा शरैस्तीक्ष्णैर्लक्ष्मणः परवीरहा ।
आददे निशितं बाणं ज्वलन्तमिव तेजसा ॥ ६९ ॥

तमादाय धनुः श्रेष्ठे योजयामास लक्ष्मणः ।
विचकर्ष च वेगेन विससर्ज च सायकम् ॥ ७० ॥

पूर्णायतविसृष्टेन शरेणानत पर्वणा ।
ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ७१ ॥

स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः ।
ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाहवे ॥ ७२ ॥

राक्षसः प्रचकम्पे च लक्ष्मणेषु प्रकम्पितः ।
रुद्रबाणहतं भीमं यथा त्रिपुरगोपुरम् ॥ ७३ ॥

चिन्तयामास चाश्वस्य विमृश्य च महाबलः ।
साधु बाणनिपातेन श्लाघनीयोऽसि मे रिपुः ॥ ७४ ॥

विचार्यैवं विनम्यास्यं विनम्य च भुजावुभौ ।
स रथोपस्थमास्थाय रथेन प्रचचार ह ॥ ७५ ॥

एकं त्रीन्पञ्च सप्तेति सायकान्राक्षसर्षभः ।
आददे सन्दधे चापि विचकर्षोत्ससर्ज च ॥ ७६ ॥

ते बाणाः कालसङ्काशा राक्षसेन्द्रधनुश्च्युताः ।
हेमपुङ्खा रविप्रख्याश्चक्रुर्दीप्तमिवाम्बरम् ॥ ७७ ॥

ततस्तान्राक्षसोत्सृष्टाञ्शरौघान्रावणानुजः ।
असम्भ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः ॥ ७८ ॥

ताञ्शरान्युधि सम्प्रेक्ष्य निकृत्तान्रावणात्मजः ।
चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम् ॥ ७९ ॥

स सन्धाय महातेजास्तं बाणं सहसोत्सृजत् ।
ततः सौमित्रिमायान्तमाजघान स्तनान्तरे ॥ ८० ॥

अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि ।
सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ॥ ८१ ॥

स चकार तदात्मानं विशल्यं सहसा विभुः ।
जग्राह च शरं तीष्णमस्त्रेणापि समादधे ॥ ८२ ॥

आग्नेयेन तदास्त्रेण योजयामास सायकम् ।

स जज्वाल तदा बाणो धनुश्चास्य महात्मनः ॥ ८३॥

अतिकायोऽतितेजस्वी सौरमस्त्रं समाददे ।
तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत् ॥ ८४॥

ततस्तं ज्वलितं घोरं लक्ष्मणः शरमाहितम् ।
अतिकायाय चिक्षेप कालदण्डमिवान्तकः ॥ ८५॥

आग्नेयेनाभिसंयुक्तं दृष्ट्वा बाणं निशाचरः ।
उत्ससर्ज तदा बाणं दीप्तं सूर्यास्त्रयोजितम् ॥ ८६॥

तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः ।
तेजसा सम्प्रदीप्ताग्रौ क्रुद्धाविव भुजं गमौ ॥ ८७॥

तावन्योन्यं विनिर्दह्य पेततुर्धरणीतले ।
निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ ॥ ८८॥

ततोऽतिकायः सङ्क्रुद्धस्त्वस्त्रमैषीकमुत्सृजत् ।
तत्प्रचिच्छेद सौमित्रिरस्त्रमैन्द्रेण वीर्यवान् ॥ ८९॥

ऐषीकं निहतं दृष्ट्वा कुमारो रावणात्मजः ।
याम्येनास्त्रेण सङ्क्रुद्धो योजयामास सायकम् ॥ ९०॥

ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः ।
वायव्येन तदस्त्रं तु निजघान स लक्ष्मणः ॥ ९१॥

अथैनं शरधाराभिर्धाराभिरिव तोयदः ।
अभ्यवर्षत सङ्क्रुद्धो लक्ष्मणो रावणात्मजम् ॥ ९२॥

तेऽतिकायं समासाद्य कवचे वज्रभूषिते ।
भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ ९३॥

तान्मोघानभिसम्प्रेक्ष्य लक्ष्मणः परवीरहा ।
अभ्यवर्षत बाणानां सहस्रेण महायशाः ॥ ९४॥

स वर्ष्यमाणो बाणौघैरतिकायो महाबलः ।
अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे ॥ ९५॥

न शशाक रुजं कर्तुं युधि तस्य नरोत्तमः ।
अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह ॥ ९६॥

ब्रह्मदत्तवरो ह्येष अवध्य कवचावृतः ।
ब्राह्मेणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा ॥ ९७॥

ततः स वायोर्वचनं निशम्य
सौमित्रिरिन्द्रप्रतिमानवीर्यः ।
समाददे बाणममोघवेगं
तदब्राह्मस्त्रं सहसा नियोज्य ॥ ९८॥

तस्मिन्वरास्त्रे तु नियुज्यमाने
सौमित्रिणा बाणवरे शिताग्रे ।
दिशः सचन्द्रार्कमहाग्रहाश् च
नभश्च तत्रास ररास चोर्वी ॥ ९९॥

तं ब्रह्मणोऽस्त्रेण नियुज्य चापे
शरं सुपुङ्खं यमदूतकल्पम् ।
सौमित्रिरिन्द्रारिसुतस्य तस्य
ससर्ज बाणं युधि वज्रकल्पम् ॥ १००॥

तं लक्ष्मणोत्सृष्टममोघवेगं
समापतन्तं ज्वलनप्रकाशम् ।
सुवर्णवज्रोत्तमचित्रपुङ्खं
तदातिकायः समरे ददर्श ॥ १०१॥

तं प्रेक्षमाणः सहसातिकायो
जघान बाणैर्निशितैरनेकैः ।
स सायकस्तस्य सुपर्णवेगस्
तदातिवेगेन जगाम पार्श्वम् ॥ १०२॥

तमागतं प्रेक्ष्य तदातिकायो
बाणं प्रदीप्तान्तककालकल्पम् ।
जघान शक्त्यृष्टिगदाकुठारैः
शूलैर्हलैश्चाप्यविपन्नचेष्टः ॥ १०३॥

तान्यायुधान्यद्भुतविग्रहाणि
मोघानि कृत्वा स शरोऽग्निदीप्तः ।
प्रसह्य तस्यैव किरीटजुष्टं
तदातिकायस्य शिरो जहार ॥ १०४॥

तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्रपीडितम् ।
पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ १०५॥

प्रहर्षयुक्ता बहवस्तु वानरा
प्रबुद्धपद्मप्रतिमाननास्तदा ।
अपूजयँल्लक्ष्मणमिष्टभागिनं
हते रिपौ भीमबले दुरासदे ॥ १०६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com